# Kashikshetramahatmyam

# કાશીક્ષેત્રમાહાત્મ્યમ્

## Document Information

Text title : Kashikshetramahatmyam

File name : kAshIkShetramAhAtmyam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 3 | 7-101||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# કાશીક્ષેત્રમાહાત્મ્યમ્

- શિવગૌરીસંવાદે -

પઞ્ચક્રોશાત્મકં રમ્યં કાશીક્ષેત્રમનુત્તમમ્ ।
તત્તુ જ્યોતિર્મયં લિઙ્ગ વેદવેદ્યં પુરાતનમ્ ॥ ૭॥

સહસ્રકનકદ્વારપરિવેષ્ટિતમુન્નતમ્ ।
વજ્રસઙ્ઘટ્ટિતશ્રેષ્ઠસહસ્રાવરણાન્વિતમ્ ॥ ૮॥

અત્યૂર્ધ્વલોકગશ્રેષ્ઠરત્નગોપુરરાજિતમ્ ।
નાનાવિધસુધાસૌધશ‍ૃઙ્ગકાન્તિવિરાજિતમ્ ॥ ૯॥

તદ્ગોપુરાગ્રભાગેષુ વિમલેષુ કદાચન ।
ન ભાતિ ભાનુસઞ્ચારચઞ્ચલાક્ષિ વરાનને ॥ ૧૦॥

તદ્ગોપુરેષુ વિમલાશ્ચન્દ્રસ્યાપિ ન રશ્મયઃ ।
નવગ્રહગણસ્યાપિ કાન્તિરન્યસ્ય વા છવિઃ ॥ ૧૧॥

પ્રત્યુતૈતદ્ગોપુરસ્ય છવિપ્રતિહતપ્રભાઃ ।
નિષ્પ્રભા એવ તિષ્ઠન્તિ સર્વે સૂર્યાદયઃ શિવે ॥ ૧૨॥

કાશીગોપુરશ‍ૃઙ્ગાણિ રમ્યાણ્યત્યુન્નતાનિ ચ ।
દૃષ્ટ્વા સુમેરુરુચ્ચોઽપિ લજ્જિતો ભવતિ ધ્રુવમ્ ॥ ૧૩॥

અમૂલ્યાનર્ઘરત્નૌઘરચિતં શ‍ૃઙ્ગમુન્નતમ્ ।
સર્વાન્ લોકાનતીત્યૈવ યાતિ પશ્ય વરાનને ॥ ૧૪॥

એતત્પુરોવર્તિશ‍ૃઙ્ગમૂલે ભાનુવિધુગ્રહાઃ ।
તિષ્ઠન્તિ નિષ્પ્રભા નિત્યં શ‍ૃઙ્ગપ્રભહતપ્રભાઃ ॥ ૧૫॥

કથમુચ્ચતરો ભાતિ પુણ્યસ્તમ્ભ ઇવામલઃ ।
ઈદૃશાન્યેવ શ‍ૃઙ્ગાણિ સન્તિ કાશ્યામનેકધા ॥ ૧૬॥

કાશીગોપુરશ‍ૃઙ્ગાણામગ્રભાગદિદૃક્ષયા ।

પુરા પૂર્વં મયા દેવિ કદાચિદ્ગતમાદરાત્ ॥ ૧૭॥

વૃષેશપ્રમુખાઃ સર્વે ધી(ઽપી)શ્વરપ્રમથાધિપાઃ ।
તતઃ સર્વેઽનિવેદ્યૈવ પરાવૃત્તાઃ શુભાનને ॥ ૧૮॥

વૃષેશ્વરાધિરૂઢેન મયૈવ ગતમગ્રતઃ ।
ગમને કતિ વા માસા યાતાઃ સઙ્ખ્યા ન સા કૃતા ॥ ૧૯॥

તતઃ પરં વામમેકં શૃઙ્ગાગ્રં રત્નરઞ્જિતમ્ ।
ગચ્છદૂર્ધ્વં મયા સ્પૃષ્ટં (દૃષ્ટં) તત્કરેણ ધૃતં તતઃ ॥ ૨૦॥

ધૃતમપ્યતિવેગેન ગતમૂર્ધ્વં તદન્તિકે ।
મમાશ્ચર્યમભૂચ્છીઘ્રં ગમનં તસ્ય પશ્યતઃ ॥ ૨૧॥

વાયોરપિ તથાવેગો ન દૃષ્ટોઽપિ કદાચન ।
તચ્છૃઙ્ગાગ્રં દૃશ્યમાનમદૃશ્યમભવત્ક્ષણાત્ ॥ ૨૨॥

તદાનીમેવ તદ્દૃષ્ટ્વા વૃષેશો વિસ્મયં ગતઃ ।
મહદાશ્ચર્યસમ્પન્નઃ તતઃ પરમહં શુભે ॥ ૨૩॥

સમાગતોઽસ્મિ કૈલાસમારુહ્ય વૃષભાધિપમ્ ।
હર્મ્યગોપુરશૃઙ્ગાણિ પરસ્પરજિગીષયા ॥ ૨૪॥

ગચ્છન્ત્યત્યન્તવેગેન સદા રત્નમયાનિ હિ ।
અષ્ટદિક્ષુ ગણાધીશાઃ શૂલમુદ્ગરપાણયઃ ॥ ૨૫॥

અસઙ્ખ્યાતાઃ સદા દેવિ વસન્ત્યમિતવિક્રમાઃ ।
સહસ્રાર્બુદભૂતેશાઃ શિતશૂલકરાઃ સદા ॥ ૨૬॥

નિવસન્તિ પ્રતિદ્વારિ તીક્ષ્ણાક્ષા વિવૃતાનનાઃ ।
શક્તિસઙ્ઘાશ્ચ બહવઃ પ્રતિદ્વારિ વરાનને ॥ ૨૭॥

જ્વલદ્વહ્નિનિભાઃ સન્તિ ભૈરવાઃ સ્વબલોન્નતાઃ ।
રવિરક્તાક્ષગન્ધર્વઃ કશ્ચિદદ્ભુતવિક્રમઃ ॥ ૨૮॥

કાશીદક્ષિણદિગ્ભાગે દુર્ધર્ષસ્તિષ્ઠતિ પ્રિયે ।
ધતોર્ધ્વમુષ્ટિરુન્મત્તઃ શૂલદન્તકરાયુધઃ ॥ ૨૯॥

પ્રજ્વલ્લદ્વહ્નિસઙ્કાશઃ સૂર્યમણ્ડલસન્નિભઃ ।
તદ્ભૃત્યાસ્તાદૃશા વીરા બલમાનવિજૃમ્ભિતાઃ ॥ ૩૦॥

રક્તવસ્ત્રા રક્તકાયાઃ શત્રુરક્તૈકજીવનાઃ ।
ઉન્મત્તભૈરવો નામ કશ્ચિદસ્તિ મહાબલઃ ॥ ૩૧॥

તસ્યામેવ દિશિ શ્રેષ્ઠઃ કોટિયોજનમુન્નતઃ ।
મન્દરાચલસઙ્કાશો મહાકાયો ભયાનકઃ ॥ ૩૨॥

કોટિકોટિગણાધીશસઙ્કાશાઙ્ગુલિવિક્રમઃ ।
શ્વેતોર્ધ્વદીર્ઘરદનઃ પિઙ્ગલાક્ષિશિરોરુહઃ ॥ ૩૩॥

સિત(શિત)વજ્રનિભાનન્તકરરોમા મદોદ્ધતઃ ।
ક્રૂરાક્ષિપાતમાત્રેણ નિહત્યારિકુલાન્ બહૂન્ ॥ ૩૪॥

પાતાલે ભુવિ નાકે વા તત્તુલ્યો નૈવ દૃશ્યતે ।
તત્ક્રૂરદૃષ્ટિપાતેન ભસ્મ સઞ્જાયતે ગિરિઃ ॥ ૩૫॥

તત્ક્રૂરદૃષ્ટ્યા પૃથિવી કમ્પમાનેવ તિષ્ઠતિ ।
ક્ષીરાબ્ધિરેકદા પૂર્વં પીતસ્તેન તતઃ પરમ્ ॥ ૩૬॥

મહાભુજો મહાકાયી(યઃ) ક્રૂરદૃષ્ટિરલોલુપઃ ।
સર્વે સમુદ્રાઃ સરિતઃ પીતાસ્તેનૈવ લીલયા ॥ ૩૭॥

શૈલેન્દ્રાઃ પૂર્વમેતેન ભક્ષિતા બહવો મુદા ।
કદાચિદૂર્ધ્વં પૃથિવી નીયતે પૃથુબાહુના ॥ ૩૮॥

છત્રીકૃતા તદા સૈવ તેન શૈલવનાન્વિતા ।
બહુકાલં પ્રયત્નેન સુરગન્ધર્વવીક્ષિતઃ ॥ ૩૯॥

ચક્રવદ્ભ્રામયામાસ નખાગ્રે સન્નિવેશ્ય ચ ।
અનેનૈવાતિમત્તેન લોકા વ્યત્યાસિતાઃ પુરા ॥ ૪૦॥

તતઃ સ કૃપયા લોકાન્ યથાપૂર્વં ચકાર ચ ।
ઇન્દ્રાદિલોકપાલાશ્ચ કૃતાઞ્જલિપુટાસ્સદા ॥ ૪૧॥

સંસેવન્તે ભયગ્રસ્તાઃ કમ્પમાનાસ્તમાદરાત્ ।
તપસા સમ્યગારાધ્ય તમેવ તદનુગ્રહાત્ ॥ ૪૨॥

કાશીપ્રવેશમિચ્છન્તિ સ્વર્ગલોકનિવાસિનઃ ।
અનિવેદ્ય ગતઃપૂર્વં તમેવ ચતુરાનનઃ ॥ ૪૩॥

કાશ્યાં તતઃ ક્રૂરદૃષ્ટિર્લીલયા ચતુરાનનમ્ ।
શીઘ્ર નિષ્કામયામાસ પ્રલયાન્તં સ ભૈરવઃ ॥ ૪૪॥

કાશીપ્રવેશો નૈવાસ્ય તદાપ્રભૃતિ સર્વથા ।
દુઃખિતઃ સ વિધિસ્તેન વિકૃતો વનમાયયૌ ॥ ૪૫॥

પ્રલપન્ વનમાશ્રિત્ય સરસ્વત્યા સ તિષ્ઠતિ ।
ઇદાનીં વિધિરત્યન્તં કાશીદર્શનલાલસઃ ॥ ૪૬॥

તમેવ તપસા સમ્યગારાધયતિ સાદરમ્ ।
તસ્ય કાશીપ્રવેશાર્થમાજ્ઞાં દાસ્યત્યસંશયમ્ ॥ ૪૭॥

અયમેતાદૃશો દેવિ કાશીપાલનતત્પરઃ ।
ઇતોઽપિ પ્રબલાઃસન્તિ કાશીસંરક્ષણક્ષમાઃ ॥ ૪૮॥

તેષાં તેજો બલં વીર્યં શૌર્યમૌદાર્યમુત્કટમ્ ।
વક્તું ન શક્યતે દેવિ સહસ્રવદનૈરપિ ॥ ૪૯॥

કાશીસંરક્ષકા વીરાઃ યાવન્તઃ સન્તિ તાવતામ્ ।
પ્રસાદેન વિના કાશી પ્રવેષ્ટું નૈત્ર શક્યતે ॥ ૫૦॥

ભિન્નપ્રકૃતિગાઃ ક્રૂરાઃ કાશીસંરક્ષકાઃ સદા ।
અનન્તા દુર્મદાઃસર્વે પરસ્પરજિગીંષવઃ ॥ ૫૧॥

અનલ્પારાધનપ્રીતા બહુસેવાભિલાષિણઃ ।
છિદ્રાન્વેષણલોલાક્ષાઃ પક્ષપાતવિવર્જિતાઃ ॥ ૫૨॥

તત્પ્રસાદાય યત્નોઽપિ કર્તું નૈવ હિ શક્યતે ।
તત્પ્રસાદસ્વરૂપં તુ ફલં કેનોપલક્ષ્યતે ॥ ૫૩॥

અનન્તજન્મભિઃ ક્લેશાઃ કેન કાર્યાઃ પ્રયત્નતઃ ।
કેન વા તત્પ્રસાદોઽપિ પ્રાપ્તવ્યઃ ક્લેશસાધિતઃ ॥ ૫૪॥

કેન સૂચ્યગ્રમારુહ્ય તપઃ કર્તવ્યમાદરાત્ ।
કેનોપવાસાઃ કર્તવ્યાઃ કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૫૫॥

કેન સન્દીપ્ય પઞ્ચાગ્નિજ્વાલા સહ્યાતિદુસ્સહા ।
કેન પર્ણાશનં કાર્યં કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૫૬॥

કેન મૃષ્ટાન્નપાનાદિ ત્યક્ત્વા નિઃસ્પૃહમાદરાત્ ।
સ્વલ્પં વાતાશનં કાર્યં કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૫૭॥

કેનાઽઽગલં જલે સ્થિત્વા હિમકાલે દુરાસદે ।

પઞ્ચાક્ષરજપઃ કાર્યઃ કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૫૮॥

કેનાધોમુખમાસાદ્ય ધૂમઃ પેયોઽતિદુઃસહઃ ।
કેનેન્દ્રિયજયઃ કાર્યઃ કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૫૯॥

કેન સ્રક્ચન્દનશ્રેષ્ઠવનિતાકનકાદયઃ ।
અવિષાદં કથં ત્યાજ્યાઃ કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૬૦॥

કેન મુક્તાવલી ત્યાજ્યા નાનારત્નવિરાજિતા ।
રુદ્રાક્ષધારણં કાર્યં કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૬૧॥

કેન નાનાવિધાઃ સૌધાસ્ત્યાજ્યાઃ શ‍ૃઙ્ગવિરાજિતાઃ ।
અરણ્યે વસતિઃ કાર્યા કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૬૨॥

કેન ત્યક્ત્વા પટુસ્પષ્ટદૃઢનારીકુચાસનમ્ ।
કુશાસનં પરિગ્રાહ્યં કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૬૩॥

કેન કાન્તાસમાક્રાન્તાં શય્યાં ત્યક્ત્વા મનોરમામ્ ।
ભસ્મશય્યા પરિગ્રાહ્યા કાશીપ્રાપ્ત્યૈ નિરન્તરમ્ ॥ ૬૪॥

કસ્યચિદ્ભરિપુણ્યેન બહુજન્માર્જિતેન હિ ।
મહેશાનુગ્રહે જાતે કાશીપ્રાપ્તિર્ભવિષ્યતિ ॥ ૬૫॥

નિરન્તરં કૃતા ભક્તિઃ યેન મય્યનપાયિની ।
તેન કાશીપુરં પ્રાપ્યં નાન્યેન શુભદર્શને ॥ ૬૬॥

યસ્ય ભક્તિર્દૃઢા નિત્યં મય્યેવાવ્યભિચારિણી ।
તસ્યૈવ કાશી સુલભા નાન્યસ્ય વરવર્ણિનિ ॥ ૬૭॥

યસ્ય લિઙ્ગાર્ચને પ્રીતિર્યસ્ય રુદ્રજપે મતિઃ ।
તસ્યૈવ કાશી સુલભા સ એવ મમ સમ્મતઃ ॥ ૬૮॥

શિવક્ષેત્રાટનં યેન બહુધા કૃતમાદરાત્ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૬૯॥

શિવપૂજૈવ સતતં કૃતા યેન ભવિષ્યતિ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૦॥

ત્રિપુણ્ડ્રધારણં યેન કૃતં સ્યાદ્વિધિપૂર્વકમ્ ।
તેનૈવકાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૧॥

કૃતં યેન સદા ભક્ત્યા શિવક્ષેત્રસ્ય માર્જનમ્ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૨॥

શિવપૂજાર્થમનિશં યેન બિલ્વાર્જનં કૃતમ્ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૩॥

શિવસ્થાનાનિ યેનૈવ કારિતાનિ કૃતાનિ ચ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૪॥

શિવભક્તૈઃ સદા પ્રીતિઃ કૃતા યેન ભવિષ્યતિ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૫॥

યેન બિલ્વવનં રમ્યં સમ્યક્કૃતમનામયમ્ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૬॥

યેન મૂર્ધ્નિ ગલે કર્ણે રુદ્રાક્ષાઃ સતતં ધૃતાઃ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૭॥

રુદ્રાભિષેકપાનીયં યેન પીતં સદા મુદા ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૮॥

યેન શાઙ્ગં લિઙ્ગદાનં કૃતં સ્યાદ્ભક્તિપૂર્વકમ્ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૭૯॥

યેન શૈવાઃ શિવપ્રીત્યૈ ભોજિતાઃ સાધુસાધનૈઃ ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૮૦॥

યેન પાર્થિવલિઙ્ગાનિ પૂજિતાન્યનિશં મુદા ।
તેનૈવ કાશી સમ્પ્રાપ્યા નાન્યેન કમલાનને ॥ ૮૧॥

શૈલાશ્ચૂર્ણયિતું શક્યા મન્દરપ્રમુખા દૃઢાઃ ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૨॥

સદ્યઃશોષયિતું શક્યાઃ નિઃશેષમતિવેલગાઃ ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૩॥

ક્ષીરાબ્ધિપ્રમુખાદીનાં પારં કર્તું હિ શક્યતે ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૪॥

વ્યત્યાસઃ સર્વલોકાનાં શક્યતે કર્તુમેકદા ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૫॥

ઇન્દુઃ કન્દુકવત્કર્તું શક્યતે ભાનુમાનપિ ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૬॥

પ્રજ્વલદ્વહ્નિમધ્યે તુ શક્યતે સ્થાતુમન્વહમ્ ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૭॥

બહુધા વિવિધં દ્રવ્યં બહુ દાતું ચ શક્યતે ।
કદાચિત્કેનચિત્સમ્યક્કાશી પ્રાપ્તું ન શક્યતે ॥ ૮૮॥

પુરા કશ્ચિદ્દ્વિજાધીશઃ શિવમૂર્તિરિતિ શ્રુતઃ ।
સર્વવેદાર્થતત્ત્વજ્ઞઃ સર્વશાસ્ત્રવિશારદઃ ॥ ૮૯॥

નીતિમાન્ નિપુણો મન્ત્રી સર્વદા શિવપૂજકઃ ।
અસઙ્ખ્યાતધનાધ્યક્ષસ્તુરઙ્ગગજપાલકઃ ॥ ૯૦॥

પુરાણશ્રવણાસક્તઃ કાશીમાહાત્મ્યમુત્તમમ્ ।
શ્રોત્રાનન્દકરં રમ્યં શુશ્રાવાઘૌઘનાશનમ્ ॥ ૯૧॥

તતઃ સ મન્મથાકારો નવમન્મથકનિન્દકઃ ।
ઉપાર્જિતગજાશ્વાદિધનધાન્યાદિકં સ્વકમ્ ॥ ૯૨॥

રૂપલાવણ્યસૌન્દર્યનવયૌવનદર્પિતામ્ ।
સ્વભાર્યાં ચ વિલોક્યાથ બભાષે વચનં મુદા ॥ ૯૩॥

શ્રીશિવમૂર્તિરુવાચ -
અપિ(યિ) ભાર્યે વચો યુક્તં શૃણુ કર્ણૈકભૂષણમ્ ॥ ૯૪॥

કાશીક્ષેત્રસ્ય માહાત્મ્યં શ્રુતમદ્ય મયા ધુના ।
દિવિ વાઽન્યત્ર વા લેકે કાશીસ્થલસમં સ્થલમ્ ॥ ૯૫॥

ન દૃષ્ટં ન શ્રુતં ક્વાપિ નાસ્તિ ચેતિ કથા શ્રુતા ।
બહુજન્મતપઃસાધ્યા કાશીપ્રાપ્તિઃ કિલામલા ॥ ૯૬॥

અલભ્યા કિલ સા કાશી વિરિઞ્ચિપ્રમુખૈરપિ ।
દુર્ધર્ષાઃ પ્રબલા વીરા નાનાશસ્ત્રાસ્ત્રપારગાઃ ॥ ૯૭॥

વિવૃત્તાસ્યા મદોન્મત્તાઃ શ્રીકાશીપાલકાઃ કિલ ।
તાદૃશાનાં પ્રસાદેન વિના કાશી શિવાત્મિકા ॥ ૯૮॥

ન દૃશ્યતે કિલામર્ત્યૈર્મનુજૈર્દૃશ્યતે કથમ્ ।

વિશ્વેશ્વરાદિભિઃ (ભિધં) લિઙ્ગ જ્યોતીરૂપં સનાતનમ્ ॥ ૯૯॥

વેદવેદાન્તસંવેદ્યમેકમસ્તીતિ સંશ્રુતમ્ ।
તલ્લિઙ્ગદર્શનાત્સદ્યો મુચ્યતે કિલ પાતકૈઃ ॥ ૧૦૦॥

તદેવારાધ્યમમલં મર્ત્યૈર્દેવાસુરૈરપિ ।
તદ્વૈશ્વેશ્વરમુત્કૃષ્ટમનાદ્યન્તમનામયમ્ ॥ ૧૦૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે કાશીક્ષેત્રમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૩ । ૭-૧૦૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 3 . 7-101..

Notes:
Śiva શિવ describes to Devī દેવી the splendor and layout of Pañcakrośātmaka Kaśī પઞ્ચક્રોશાત્મક કાશી, and mentions the presence of the Eternal (Sanātana સનાતન) Viśveśvara Jyotirliṅga વિશ્વેશ્વર જ્યોતિર્લિઙ્ગ in Kaśī કાશી. He delineates the attributes of those who can attain the fortune of being able to reach and be in Kaśī કાશી; and outlines the merits of being able to do so.
Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

*Kashikshetramahatmyam*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*